# Devatasarvabhaumaproktam Shiva Stuti

# દેવતાસાર્વભૌમપ્રોક્તં શિવસ્તુતિઃ

## Document Information

Text title : Devatasarvabhaumaproktam Shiva Stuti

File name : devatAsArvabhaumaproktaMshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | ?160-?170||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# દેવતાસાર્વભૌમપ્રોક્તં શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
દેવતાસાર્વભૌમ -
ભક્તાર્તિભઞ્જન કરુણાકર શઙ્કરેશ
શમ્ભો મહેશ ભવભર્ગ પિનાકપાણે ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૧/?૧૬૦॥

ગૌરીપતે પુરહરામિત પુણ્યમૂર્તે
હે મુક્તિદાયક યમાન્તક વિશ્વમૂર્તે ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૨/?૧૬૧॥

વિશ્વાધિકાવ્યય વિશુદ્ધગુણ સ્વભાવ
નિર્દ્વન્દ્વ નિત્ય નિરુપાધિક નિર્વિકાર ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૩/?૧૬૨॥

સોમ ત્રિણેત્ર હરિનેત્ર સમર્ચિતાઙ્ગઘ્રે
બ્રહ્મેન્દ્ર મુખ્ય સુરવન્દિત પાદપદ્મ ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૪/?૧૬૩॥

નિલિમ્પ પાલય સુરાસુર સર્ગવર્ગ-
સૃષ્ટિસ્થિતિપ્રલયકારણ સર્વરૂપ ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૫/?૧૬૪॥

શાર્દૂલચર્મપરિવીત સુરાસુરેશ
કર્પૂરગૌર કરુણાકર ચન્દ્રમૌલે ।

સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૬/?૧૬૫॥

બિલ્વાર્ચનપ્રિય વિભૂતિ વિભૂષિતાઙ્ગ
નિઃસઙ્ગ નિર્ગુણ નિરઞ્જન નિર્વિકાર ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૭/?૧૬૬॥

યોગીન્દ્ર માનસસરોરુહ સન્નિવિષ્ટ
શ્રેષ્ઠેષ્ટદાયક નિનિષ્ટજનેષ્ટ શૂલિન્ ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૮/?૧૬૭॥

શાન્તાન્તકાન્તક મુમુક્ષુજનાભિસેવ્ય
શૈલાધિરાજતનયાયુતવામભાગ ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૯/?૧૬૮॥

કલ્યાણરૂપ કનકાચલચારુચાપ
વિજ્ઞાનરૂપ દુરવાપ વિહસ્ત પાપ ।
સંસારસાગરમસારમઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૧૦/?૧૬૯॥

વેદાન્તવેદ્યવિભવાવ્યય શુદ્ધ વૃત્તે
વૃત્તિપ્રદાભયદ દક્ષદયાસમુદ્ર ।
સંસાર સાગરં અસારં અઘોરમાપ્તં
મામુદ્ધર ત્રિપુરસૂદન મન્મથારે ॥ ૧૧/?૧૭૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દેવતાસાર્વભૌમપ્રોક્તં શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ?૧૬૦-?૧૭૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. ?160-?170..

Notes:

Śloka numbers in the source text have duplication from 160-163 with many of them missing the numbering. The Śloka-s in this Stuti are hence marked as /?, and renumbering from 1-11 has also been done for readers' reference.

Proofread by Ruma Dewan

*Devatasarvabhaumaproktam Shiva Stuti*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*